# Devaih Krita Narayanastutih

# દેવૈઃ કૃતા નારાયણસ્તુતિઃ

## Document Information

Text title : NarayanastutiH Devaih Krita

File name : nArAyaNastutiHdevaiHkRRitA.itx

Category : vishhnu, stuti, viShNu

Location : doc_vishhnu

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : vAyupurANa. ekaliNgamAhAtmyam . navamo.adhyAyaH - indravaradAnam . 9.18-29 ..

Latest update : October 14, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 19, 2025

*sanskritdocuments.org*

# દેવૈઃ કૃતા નારાયણસ્તુતિઃ

(એકલિઙ્ગમાહાત્મ્યે)

દેવા ઊચુઃ -

મત્સ્યઃ કૂર્મો વામનસ્ત્વં નૃસિંહો
રામો વિષ્ણુઃ શૂકરો ભાર્ગવશ્ચ ।
દત્તાત્રેયો બુધ્દરૂપોઽથ ભાવી
કલ્કિરૂપઃ પાલયામાસ વિશ્વમ્ ॥ ૧૮॥

ભૂમેર્ભારં ત્વદૃતે કઃ સમર્થો
વોઢું દૈત્યાન્ હન્તુમન્યો ન ચાસ્તિ ।
માત્સ્યં રૂપં યો વિધાયાર્ણવામ્ભ-
સ્તૂર્ણં ભિત્ત્વા સર્વવિદ્યામયત્વમ્ ॥ ૧૯॥

નાવં કૃત્વા તત્ર વિશ્વં નિધાય
વેદાન્ યો વૈ બ્રહ્મણે તાન્ દદૌ હિ ।
કૂર્મો ભૂત્વા સ્વસ્ય પૃષ્ઠે નિધાય
ક્ષોણીં ન્યસ્ય તત્ર ચૈનં શિરસ્સુ ॥ ૨૦॥

વિશ્વં દધ્રે વિશ્વકર્તા ચ એકઃ
કસ્તે પારં જ્ઞાતુમન્યઃ સમર્થઃ ।
કૃત્વા રૂપં શૂકરં યો મહાત્મા
મગ્નાં પૃથ્વીં હેલયોચ્ચૈશ્ચચાર ॥ ૨૧॥

સૈંહી મૂર્તિઃ કશિપુ યો હિરણ્ય-
પૂર્વં દદ્રે પાણિજૈર્વક્ષસીહ ।
અજો જાતો વામનો વામનઃ સન્
હ્રસ્વાદ્ધ્રસ્વં યો વિધાયાચ્છરૂપમ્ ॥ ૨૨॥

ધાતાઽદિત્યાં પુત્રતાં પ્રાપ્યમાનઃ

પાતાલે વૈરોચનં ચચ્છલેન ।
રામેણ ત્રિઃસપ્તકૃત્વો રુષા તુ
હન્તું ક્ષત્રં હૈહયં વૈ વિજિત્ય ॥ ૨૩॥

હ્રદં કૃત્વાઽસૃગ્ભિરાશુ સ્વકીયાન્
યો વૈ પિતૄનતર્પયત્ રામકૂપે ।
દશગ્રીવં યો નિહત્યાજિભૂમૌ
રામૌ ભૂત્વા લક્ષ્મણેનાનુયુક્તઃ ॥ ૨૪॥

બધ્વા સેતું વાનરૈઃ સાગરેઽપિ
પૌલસ્ત્યં યો વૈ મૈથિલીમાનિનાય ।
દેવક્યાં યઃ પુત્રતામેતિ ભૂયઃ
કંસં જિત્વા ભૂમિભારસ્ય હર્તા ॥ ૨૫॥

હત્વા ચૈદ્યાન્નારકાદીંશ્ચ સર્વાન્
ઇન્દ્રે રાજ્યં કલ્પયામાસ નાકે ।
યોગં યો(ઽ)ગા(દ્)યો બુધસ્યૈવ રૂપો
નિર્વ્યાપારો વિશ્વકૃદ્વિશ્વરૂપઃ ॥ ૨૬॥

ધ્યાનં ચક્રે યોગમાલાં ગૃહીત્વા
યોગિધ્યેયો નાસ્તિ પૂજ્યોઽસ્ય કશ્ચિત્ ।
સ્મર્તું વેદાનત્રિપુત્રો ભવાંશ્ચ
દત્તાત્રેયો વિશ્વયોનેઃ સકાશાત્ ॥ ૨૭॥

હૃતાન્ મત્વા માયયા વિપ્રપુત્રાન્
ભૂયોઽદાદ્વૈ બ્રાહ્મણેભ્યો મહાત્મા ।
યો વેદાનાં બહુમાર્ગં વ્યધત્ત
પારાશર્યો વિશ્વમુખ્યસ્ય હેતોઃ ॥ ૨૮॥

વિસ્તારત્વં યશ્ચકારાથ વેદે
સંસારાબ્ધૌ પાતિતં વિશ્વમીક્ષ્ય ।
એવં વિશ્વં યો બિભર્તિ સ્વરૂપૈ-
રાસઙ્ખ્યેયૈસ્તસ્ય સઙ્ખ્યાં ન વિદ્મઃ ॥ ૨૯॥

ઇતિ એકલિઙ્ગમાહાત્મ્યે દેવૈઃ કૃતા નારાયણસ્તુતિઃ સમ્પૂર્ણા ।

- ॥ એકલિઙ્ગમાહાત્મ્યમ્ । નવમોઽધ્યાયઃ - ઇન્દ્રવરદાનમ્ । ૯.૧૮-૨૯॥

- .. ekali NgamAhAtmyam . navamo.adhyAyaH - indravaradAnam . 9.18-29 ..

Notes:

Devatās દેવતાઃ eulogize the Daśāvatāra-s દશાવતારાઃ of Nārāyaṇa નારાયણ, as they pray to Him to grant a way towards respite from the atrocities caused by Vṛtrāsura વૃત્રાસુર.

EkaliṅgaMāhātmyam એકલિઙ્ગમાહાત્મ્યમ્, that constitutes a SthalaPurāṇa સ્થલપુરાણ and SthalaMāhātmyam સ્થલમાહાત્મ્યમ્, has been composed in two styles - Paurāṇika પૌરાણિક and Kāvyamaya કાવ્યમય. It includes the descriptions about the manifestation of the Ekaliṅga Śiva Kṣetra એકલિઙ્ગ શિવ ક્ષેત્ર in relation to the story of the duo - Baṣpa Rājā બાષ્પ રાજા - Hārīta Muni હારીત મુનિ, and the lineage of kings of Citrakūṭa ચિત્રકૂટ (now k.a. Cittauṛagaṛha ચિત્તૌડ઼ગઢ઼ ) and Medapāṭa મેદપાટ (now k.a. Mevāṛa મેવાડ઼ ) including Mahārāṇā Kumbhā મહારાણા કુમ્ભા.

Baṣpa Rājā બાષ્પ રાજા is now popularly known as Bappā Rāvala બપ્પા રાવલ.

The VāyuPurāṇam વાયુપુરાણમ્ has been attributed to be the source composition of EkaliṅgaMāhātmyam એકલિઙ્ગમાહાત્મ્યમ્ as the main narrator of the same is Vāyu વાયુ.

EkaliṅgaMāhātmyam - Paurāṇika એકલિઙ્ગમાહાત્મ્યમ્ - પૌરાણિક is composed in 32 chapters that, with a brief summary of each chapter; and the EkaliṅgaMāhātmyam - Kāvyamayam એકલિઙ્ગમાહાત્મ્યમ્ - કાવ્યમયમ્ can be accessed from the respective links given below.

EkaliṅgaMāhātmyam - Kāvyamayam એકલિઙ્ગમાહાત્મ્યમ્ - કાવ્યમયમ્ includes description of the lineage of Baṣpa Rājā બાષ્પ રાજા, Stuti સ્તુતિ of the erudite Mahārāṇā Kumbhā મહારાણા કુમ્ભા i.e. Kumbhakaraṇa કુમ્ભકરણ, and the Pañcāyatana Stuti પઞ્ચાયતન સ્તુતિ. The latter comprises of Stuti-s of Ganeśa ગણેશ, Sūrya સૂર્ય, Nārāyaṇa નારાયણ, Śiva શિવ, Caṇḍikā ચણ્ડિકા and Ekaliṅga Śiva એકલિઙ્ગ શિવ.
It is noteworthy that the Pañcāyatana Stuti પઞ્ચાયતન સ્તુતિ has some names associated with Kumbhā કુમ્ભા such that he is remembered with each of the Deity worshipped with this stuti. Towards conclusion, there is EkaliṅgaNamaskāra એકલિઙ્ગનમસ્કાર.

Encoded and proofread by Ruma Dewan

*Devaih Krita Narayanastutih*

pdf was typeset on October 19, 2025

Please send corrections to *sanskrit@cheerful.com*